# केरलपाठावलिः
# संस्कृतम्
अक्कादमिक-संस्कृतविद्यालयानां कृते

## षष्ठी कक्ष्या

# KERALA READER
# SANSKRIT
For Academic and Sanskrit Schools

## STANDARD VI

Government of Kerala
Department of General Education
2025

# राष्ट्रगीतम्

जन-गण-मन-अधिनायक जय हे
भारत-भाग्य-विधाता
पंजाब-सिंधु-गुजरात-मराठा
द्राविड़-उत्कल-बंगा
विंध्य-हिमाचल-यमुना-गंगा
उच्छल-जलधि-तरंगा
तव शुभ नामे जागे, तव शुभ
आशिष मांगे,
गाहे तव जय-गाथा ।
जन-गण-मंगल-दायक जय हे
भारत भाग्य विधाता ।
जय हे, जय हे, जय हे,
जय जय जय जय हे ।

# प्रतिज्ञा

भारतं मम राष्ट्रम् । सर्वे भारतीयाः मे भ्रातरः । अहं मम राष्ट्रे स्निह्यामि । तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि । तद्योग्यतां सम्पादयितुं सदा यतिष्ये च । अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च । विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च । मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम् । राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि ।

**State Council of Educational Research and Training (SCERT)**

Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in,
email: scertkerala@gmail.com
Phone: +91 471-2341883, fax: +91 471-231869
First Edition: 2025
Printed at : KBPS, Kakkanad, Kochi-30
©Department of General Education, Government of Kerala

प्रियच्छात्राः,

संस्कृतेः आनन्ददायकं विशालं च लोकं प्रवेष्टुं छात्राणां मार्गदर्शनमेव संस्कृताध्ययनस्य लक्ष्यम् । पञ्चमकक्ष्यायाः पाठ्यपुस्तकस्य नैरन्तर्येण एव षष्ठकक्ष्यायाः पाठ्यपुस्तकमपि सज्जीकृतम् । अस्मिन् पाठ्यपुस्तके सरलया सरसया रीत्या पाठाः समायोजिताः । सुभाषितानि, चित्रकथा, विवरणानि, बालकविता, प्रहेलिका इत्यादिभिः व्यवहाररूपैः सम्पुष्टमिदं पाठ्यपुस्तकम् । राष्ट्रिय-कौशल-योग्यताप्रारूपं (National Skill Qualification Frame work) विज्ञानविनिमयोपाधयश्च अस्मिन् पाठ्यपुस्तके परिगणिताः ।

सर्गवैभवविकासाय स्वतन्त्रचिन्तोद्दीपनाय व्यक्तित्वविकासाय च यथेष्टम् अवसराः अस्मिन् प्रकल्पिताः । पदपरिचयं समार्जयितुं, भाषायाः प्रयोगान् अवगन्तुं, रचनाप्रवर्तनेषु भागं स्वीकर्तुं च पठनानुभवाः उपकारकाः भवेयुः । अस्य पाठ्यपुस्तकस्य परिशीलनेन छात्राः संस्कृतं पठितुं प्रयोक्तुं च सन्नद्धाः भविष्यन्तीति आशासे ।

भवदीयः

**डा. जयप्रकाश् आर् के**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXT BOOK DEVELOPMENT COMMITTEE

### Advisor

**V. Madhavan Pillai**, Associate Professor, & HoD Sanskrit (Rtd.), Govt. College for Women, Thiruvananthapuram

### Chairperson

**Dr. Sujith S**, Asst. Professor, Govt Sanskrit College, Thiruvananthapuram

### Experts

**Dr. Anil Narayanan N**, Asst. Professor, Govt. Sanskrit College, Thiruvananthapuram

**Unnikrishnan Nair S**, H S T (Rtd,) G H S S Kizhakkenchery, Palakkad

### Participants

**Dr. Aswathy Gopinath**, G O H S, Edathanattukara, Palakkad
**Babu Thuruthipalli**, G U P S Muzhakkoth, Kasaragod
**Jayachandran S**, B P C, B R C, Parasala, Thiruvananthapuram
**Manoj P G**, S G U P S, Venmony, Idukki
**Prasanthan Puthiyandi**, G U P S, Kadamberi, Kannur
**Rajesh C S**, G H S S, Vellathooval, Idukki
**Dr. Vasudevan Namboodiri P K**, Edakkeppuram U P S, Kannur
**Dr. Vipin G Nair,** K G U P S, Elampallur, Kollam
**Dr. Vipin Thomas**, V O U P S, Punalur, Kollam

### Artists

**Agith G Krishnan,** B R C, Kollamgode, Palakkad
**Ashik L,** G B H S S, Tirur, Malappuram
**Sujay Sudhakaran,** Gurulaya, Kilimanoor, Thiruvananthapuram

**Academic Coordinator**
**Dr. Anil D**
Research Officer SCERT, Kerala.

**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्**
**State Council of Educational Research and Training, Kerala**

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ जीवनं सुन्दरम् | १ | मधुरं रुचिरम् | सुभाषितम् | 07 - 17 |
| | २ | आपदि मित्रं मित्रम् | चित्रकथा | 18 - 28 |
| | ३ | शास्त्रकौतुकम् | शास्त्रसाहित्यम् | 29 - 36 |
| २ जीवनयात्रा | ४ | तीरात् पारम् | बालकविता | 37 - 45 |
| | ५ | आहिमाचलम् | विवरणम् | 46 - 54 |
| | ६ | भीमाकारं पश्यामः | सम्भाषणम् | 55 - 63 |
| ३ जीवनविजयः | ७ | जय सन्ततम् | सचित्रविवरणण् | 64 - 75 |
| | ८ | बाबा साहेब् अम्बेद्कर् | लघुविवरणम् | 76 - 83 |
| ४ जीवनं भुवनम् | ९ | अग्रे गच्छामः | प्रभाषणम् | 84 - 91 |
| | १० | वदाम किम् ? | प्रहेलिका | 92 - 101 |

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;**
സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാ നിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

एककम् १

# जीवनं मनोहरम्

स्नेहः, साहोदर्यम्, क्षमा, अनुकम्पा, विश्वस्तता, सहायमनस्कता इत्यादयः सद्गुणाः मानवजीवने अत्यन्तापेक्षिताः भवन्ति। गुणान् एतान् विहाय मानवजीवनम् अपूर्णम् असुन्दरं च भवेत्। एतानां धार्मिकमूल्यानां स्वांशीकरणाय शास्त्रानुगुणजीवनाय एवं जीवितपुरोगत्यै च गुणाधिष्ठितविद्याभ्यासः अवश्यं समार्जनीयो भवेत्। एतदर्थं सहायकाः मधुरं रुचिरम्, आपदि मित्रं मित्रम्, शास्त्रकौतुकं चेति त्रयः पाठाः एककेऽस्मिन् समायोजिताः भवन्ति।



# प्रथमः पाठः

# मधुरं रुचिरम्

महतः समूहस्य निर्माणाय धार्मिकमूल्यानि परिपालनीयानि एव। अतः मानवजीवने धार्मिकमूल्यानां स्वांशीकरणम् अवश्यं भवति। तदर्थं सुभाषितानि महदुपकारकाणि भवन्ति। तादृशानि त्रीणि सुभाषितानि पाठेऽस्मिन् प्रतिपाद्यन्ते।

**ऐक्यं बलं समाजस्य**<br>
**तदभावे स दुर्बलः।**<br>
**तस्मादैक्यं प्रशंसन्ति**<br>
**दृढं राष्ट्रहितैषिणः॥**

**पदच्छेदः**

तस्मादैक्यम् - तस्मात् + ऐक्यम्

**अन्वयः**

ऐक्यं समाजस्य बलम् (भवति)। तदभावे सः(समाजः) दुर्बलः (भवति)। तस्मात् राष्ट्रहितैषिणः दृढम् ऐक्यं प्रशंसन्ति।

**सारांशः**

समूहस्य बलम् ऐकमत्यं भवति। तस्य अभावे समाजः दुर्बलः भवति। तस्मात् राष्ट्रहितम् इच्छन्तः जनाः ऐक्यं ध्रुवं प्रशंसन्ति।

**न कश्चिदपि जानाति**
**किं कस्य श्वो भविष्यति ।**
**अतः श्वः करणीयानि**
**कुर्यादद्यैव बुद्धिमान् ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| कश्चिदपि | - | कश्चित् + अपि |
| श्वो भविष्यति | - | श्वः + भविष्यति |
| कुर्यादद्यैव | - | कुर्यात् + अद्य + एव |

**अन्वयः**

किं कस्य श्वः भविष्यति (इति) कश्चित् अपि न जानाति। अतः बुद्धिमान् श्वः करणीयानि (कार्याणि) अद्य एव कुर्यात्।

**सारांशः**

आगामिनि निमेषे किं भविष्यति इति यःकोऽपि न जानाति। अतः बुद्धिमन्तः समूहहितैषिणः सज्जनाः श्वस्तनकार्येषु अद्यैव सज्जाः भवेयुः।

**सर्वः सर्वं न जानाति**
**सर्वज्ञो नास्ति कश्चन।**
**नैकत्र परिनिष्ठास्ति**
**ज्ञानस्य पुरुषे क्वचित् ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| नास्ति | - | न + अस्ति |
| परिनिष्ठास्ति | - | परिनिष्ठा + अस्ति |
| नैकत्र | - | न + एकत्र |

**विग्रहः**

| | | |
|---|---|---|
| सर्वज्ञः | - | सर्वं जानाति इति |

**अन्वयः**

सर्वः सर्वं न जानाति। कश्चन सर्वज्ञः नास्ति। ज्ञानस्य एकत्र क्वचित् पुरुषे (वा) परिनिष्ठा नास्ति।

**सारांशः**

सर्वः (सर्वे जनाः) सर्वं वस्तुतत्त्वं न जानाति। तथैव कश्चन पुमानपि सर्वज्ञः न भवति। यतः ज्ञानस्य स्थितिः एकत्र (सभायां वा देशे वा) तथा कस्मिंश्चित् पुरुषे वा न वर्तते इति।



## पठनप्रवर्तनानि

उच्चैः वदतु ।



त्रिचक्रिका



नौका



अजा



वीणा



लेखनी



महिषी

वाक्यानि उच्चैः वदतु लिखतु च ।



मातामही अजां आनयति ।



शास्त्रज्ञाः विक्षेपणीं प्रेषयन्ति ।



बालः ............... (वीणा) वादयति ।



पितामहः .......... (आकाशवाणी) श्रृणोति ।

सुभाषितं भावात्मकतया व्यक्तिशः सङ्घशः वा विद्यालयसभायाम् आलपन्तु ।



'ऐकमत्यं महाबलम्' इत्याशयमधिकृत्य लघुभाषणं कक्ष्यायाम् अवतारयतु ।




चित्रस्य आशयानुसारम् उचितं सुभाषितं पाठभागात् स्वीकृत्य उचितस्थाने लिखतु ।





.................................................. ..................................................

.................................................. ..................................................

**पदानाम् अर्थं लिखतु ।**




**अमरकोशः**

बुद्धिः – बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।

**नामरूपाणि**

आकारान्तः स्त्रीलिङ्गः वीणा शब्दः ।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | वीणा | वीणे | वीणाः |
| सं.प्रथमा | हे वीणे | हे वीणे | हे वीणाः |
| द्वितीया | वीणाम् | वीणे | वीणाः |
| तृतीया | वीणया | वीणाभ्याम् | वीणाभिः |
| चतुर्थी | वीणायै | वीणाभ्याम् | वीणाभ्यः |
| पञ्चमी | वीणायाः | वीणाभ्याम् | वीणाभ्यः |
| षष्ठी | वीणायाः | वीणयोः | वीणानाम् |
| सप्तमी | वीणायाम् | वीणयोः | वीणासु । |

## धातुरूपाणि

ज्ञा (अवबोधने) धातुः परस्मैपदी लट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जानाति | जानीतः | जानन्ति |
| मध्यमपुरुषः | जानासि | जानीथः | जानीथ |
| उत्तमपुरुषः | जानामि | जानीवः | जानीमः । |

## शब्दकोशः

| शब्दः | संस्कृतम् | मलयालम् | आङ्गलेयम् | कन्नटा |
|---|---|---|---|---|
| अतः | तस्मात् | ആ കാരണത്താൽ | So that | ಆದುದರಿಂದ |
| अद्य | अस्मिन् दिने | ഇന്ന് | Today | ಇವತ್ತು |
| ऐक्यम् | एकतायाः भावः | ഐക്യം | Unity | ಐಕ್ಯತೆ |
| कुर्यात् | कुरु | ചെയ്താലും | May be done | ಮಾಡಬೇಕು |
| जानाति | अवगच्छति | മനസിലാക്കുന്നു | Knows | ಗೊತ್ತಿದೆ |
| दृढम् | निश्चयेन | ഉറപ്പായും | Surely | ಬಲಿಷ್ಠ |
| प्रशंसन्ति | अभिनन्दन्ति | അഭിനന്ദിക്കുന്നു | Appreciate | ಅಭಿನಂದಿಸುತ್ತಾನೆ |
| राष्ट्रहितैषिणः | राष्ट्रक्षेमम् इच्छन्तः | രാജ്യനന്മ ആഗ്രഹിക്കുന്നവർ | Desirous of welfare state | ದೇಶದ ಹಿತವನ್ನು ಅಗ್ರಹಿಸುವ |
| श्वः | आगामिनि दिने | നാളെ | Tomorrow | ನಾಳೆ |
| समाजस्य | समूहस्य | സമൂഹത്തിന്റെ | of the society | ಸಮಾಜದ |
| सर्वज्ञः | सर्ववित् | എല്ലാം അറിയുന്നവൻ | Knowing all | ಎಲ್ಲವನ್ನೂ ಬಲ್ಲವನು. |
| परिनिष्ठा | स्थितिः | നിലനിൽപ്പ് | Existence | ಅಸ್ತಿತ್ವ |

## अनुबन्धः

**अधिकवाचनांशः**

**भाषासु मधुरा मुख्या**
**दिव्या गीर्वाणभारती ।**
**तस्यां हि मधुरं काव्यं**
**तत्रापि च सुभाषितम् ॥**

**अधिगताः अंशाः**

सुभाषितं सतालम् आलपत् ।
लघुभाषणम् अकरोत्।
पदानाम् अर्थम् अलिखत् ।
सुभाषितस्य आशयम् अवागच्छत् ।
आशयानुसारं सुभाषितम् अलिखत् ।

**अधो दत्ते सुभाषिते सूचितस्य कस्यचन पक्षिणः चित्रम् अत्र दत्तमस्ति । बिन्दून् योजयित्वा चित्रस्य वर्णलेपनं करोतु ।**

काकदृष्टिर्बकध्यानं
श्वाननिद्रा तथैव च ।
अल्पाहारं जीर्णवस्त्रम्
एतद्विद्यार्थिलक्षणम् ॥



# द्वितीयः पाठः

## आपदि मित्रं जानीयात्

चित्रस्य आशयः कः ? वदतु।



एकत्र किञ्चन महारण्यम् आसीत्। तत्र हरिणः काकः च वसतः। ते मित्रे आस्ताम्। एकदा कश्चन जम्बुकः तत्र आगतवान्।




अहो एकः मृगः! एतस्य मांसं केनापि उपायेन भक्षयामि ?
कः एषः ?
मित्र, कुशलं किम् ?
कुशलमेव। को भवान् ?
निरालम्बो अहम्, तव मैत्रीम् इच्छामि।
अस्तु।


(जम्बुकमुद्दिश्य)
कः एषः ?
एषः जम्बुकः।
अयं सौहृदम् इच्छति।


अस्य स्वभावः कीदृशः ? स्वभावम्
अज्ञात्वा मैत्री न करणीया।


(अन्येद्युः)
मित्र, वनसीमायाम् एकं
व्रीहिक्षेत्रम् अस्ति। तत् दर्शयामि।
सुभिक्षम् अन्नं खादितुम्
इच्छामि। गच्छावः।


हरिणः प्रतिदिनं क्षेत्रम् आगत्य व्रीहिम्
अखादत्। क्षेत्रपतिना तं ग्रहीतुं तत्र जालं
निक्षिप्तम्।


हरिणः जाले बद्धः । सः साहाय्यार्थं जम्बुकम् आह्वयत् ।
रक्ष माम् ।
श्वः जालच्छेदं करिष्यामि।
मित्र, भवान् मृत इव शयनं करोतु । यदा अहं शब्दं करोमि तदा धावतु ।
आम्
एषः हरिणः मृतः खलु । जालं कर्तयामि ।




**आपदि मित्रं जानीयात् ।**

**पदच्छेदः**

| | | |
|---|---|---|
| जम्बुकमुद्दिश्य | - | जम्बुकम् + उद्दिश्य |
| वसुधैव | - | वसुधा + एव |
| श्रुत्वैतत् | - | श्रुत्वा + एतत् |
| केनापि | - | केन + अपि |

**विग्रहः**

| | | |
|---|---|---|
| प्रतिदिनम् | - | दिनं दिनं प्रति । |
| वनसीमायाम् | - | वनस्य सीमा  वनसीमा, तस्याम् । |
| क्षेत्रपतिना | - | क्षेत्रस्य पतिः  क्षेत्रपतिः, तेन । |

## पठनप्रवर्तनानि

**पदानि उच्चैः वदतु ।**



पुष्पम्



फलम्



छत्रम्



रक्तफलम्



कङ्कणम्



युतकम्

बिन्दून् योजयित्वा चित्राणि पूर्तीकरोतु। तदनन्तरं भवताम् इष्टतमं कथापात्रं वर्णैः लेपयतु।







'आपदि मित्रं मित्रम्' इत्याशयम् अधिकृत्य चर्चां करोतु।




उदाहरणानुसारं पूरयतु।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| उदा - | पुस्तकम् | पुस्तके | पुस्तकानि |
| | वृन्ताकम् | .......... | वृन्ताकानि |
| | पर्णम् | ........... | पर्णानि |
| | .......... | पनसे | पनसानि |
| | लोकयानम् | लोकयाने | ........... |

**समानाशययुक्तानां कथानां सम्पुटं रचयतु ।**




**पदानाम् अर्थं लिखतु ।**




**अमरकोशः**

अरण्यम् - अटव्यरण्यं विपिनं गहनं काननं वनम् ।
हरिणः - मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।
जम्बुकः - श्रृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ।

**धातुरूपाणि**

**अस (भुवि) धातुः परस्मैपदी लङ्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमपुरुषः | आसम् | आस्व | आस्म। |

**नामरूपाणि**

**अकारान्तः नपुसंकलिङ्गः वनशब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | वनम् | वने | वनानि |
| सं.प्रथमा | हे वन | हे वने | हे वनानि |
| द्वितीया | वनम् | वने | वनानि |
| तृतीया | वनेन | वनाभ्याम् | वनैः |
| चतुर्थी | वनाय | वनाभ्याम् | वनेभ्यः |
| पञ्चमी | वनात् | वनाभ्याम् | वनेभ्यः |
| षष्ठी | वनस्य | वनयोः | वनानाम् |
| सप्तमी | वने | वनयोः | वनेषु। |

**शब्दकोशः**

| **पदम्** | **संस्कृतम्** | **मलयालम्** | **आङ्गलेयम्** | **कन्नटा** |
|---|---|---|---|---|
| अखादत् | अभक्षयत् | തിന്നു | Ate | ತಿಂದನು |
| अज्ञात्वा | अविज्ञाय | മനസ്സിലാകാതെ | Having not known | ತಿಳಿಯದೆ |

| पदम् | संस्कृतम् | मलयालम् | आङ्गलेयम् | कन्नटा |
|---|---|---|---|---|
| अन्येद्युः | अपरेद्युः | അടുത്ത ദിവസം | Next day | ಮಾರನೇ ದಿನ |
| आगत्य | आगम्य | വന്നിട്ട് | Having come | ಬಂದು |
| उद्दिश्य | समुद्दिश्य | ഉദ്ദേശിച്ച് | Having aimed | ಉದ್ದೇಶಿಸಿ |
| क्षेत्रपतिः | भूस्वामी | വയലിന്റെ ഉടമ | Owner of the field | ಗದ್ದೆಯ ಒಡೆಯ |
| खादितुम् | भोक्तुम् | തിന്നുന്നതിന് | To eat | ತಿನ್ನಲು |
| जानीयात् | विजानीयात् | അറിഞ്ഞാലും | Please understand | ತಿಳಿಯಿರಿ |
| निक्षिप्तम् | स्थापितम् | നിക്ഷേപിക്കപ്പെട്ടു | Deposited | ನಿಕ್ಷೇಪಿಸಲಾಗಿದೆ |
| निरालम्बः | आश्रयहीनः | ആശ്രയമില്ലാത്ത | Helpless | ಆಶ್ರಯವಿಲ್ಲದ |
| महारण्यम् | महावनम् | വലിയ കാട് | Jungle | ಕಾಡು |
| वनसीमायाम् | काननावधौ | കാടിന്റെ അതിർത്തിയിൽ | At the boundary of the forest | ಕಾಡಿನ ಸೀಮೆಯಲ್ಲಿ |

**अधिगताः अंशाः**

पदानि उच्चैः अपठत्।
चित्राणि पूर्तीकृत्य वर्णलेपनम् अकरोत्।
दत्तविषयमधिकृत्य चर्चा कृता।
कथासम्पुटम् अरचयत्।
पदानि यथोचितम् अपूरयत्।

## अनुबन्धः

**अधिकवाचनांशः**

आपत्सु मित्रं जानीयात्
युद्धे शूरमृणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु
व्यसनेषु च बान्धवान् ॥

आपत्सु मित्रं, युद्धे शूरं, ऋणे शुचिं, क्षीणेषु वित्तेषु भार्यां, व्यसनेषु बान्धवान् च जानीयात् ।

**सूर्यचन्द्रयोः मैत्री कीदृशी भवति ? चर्चां करोतु ।**





# तृतीयः पाठः

## शास्त्रकौतुकम्



भारतस्य प्रथमः कृत्रिमोपग्रहः कः ?
एतत् नाम कथं प्राप्तम् ?

संस्कृतभाषायां नैके विज्ञानोद्दीपकाः ग्रन्थाः विद्यन्ते। ते ग्रन्थाः तेषां कर्तारश्च लोके प्रथिताः भवन्ति। एतेषु ग्रन्थेषु विद्यमानाः सर्वे श्लोकाः अपि विज्ञानदायकाः भवन्ति। तेभ्यः श्लोकद्वयं पाठेऽस्मिन् समायोजितम्।

१. एकं च दश च शतं च सहस्रं त्वयुतनियुते तथा च प्रयुतम्।
कोट्यर्बुदं च वृन्दं स्थानात् स्थानं दशगुणं स्यात्॥

(आर्यभटीयम् – गणितपादः १)

**पदच्छेदः**

त्वयुतनियुते - तु + अयुतनियुते

**विग्रहः**

अयुतनियुते - अयुतं च नियुतं च।

कोट्यर्बुदम् - कोटिः च अर्बुदं च अनयोः समाहारः।

| | |
|---|---|
| १ | एकम् |
| १० | दश |
| १०० | शतम् |
| १००० | सहस्रम् |
| १०००० | अयुतम् |
| १००००० | नियुतम् |
| १०००००० | प्रयुतम् |
| १००००००० | कोटिः |
| १०००००००० | अर्बुदम् |
| १००००००००० | वृन्दम् |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| एकम् | - | एकम् इति संख्या (१) |
| दश | - | दश इति संख्या (१०) |
| शतम् | - | शतम् इति संख्या (१००) |
| च | - | अपि |
| सहस्रम् | - | सहस्रम् इति संख्या (१०००) |
| तु | - | अपि |
| अयुतनियुते | - | अयुतं (१००००) नियुतं (१०००००) च |
| तथा | - | एवं प्रकारेण |
| प्रयुतम् | - | प्रयुतम् इति संख्या (१००००००) |
| कोट्यर्बुदम् | - | कोटिः (१०००००००) अर्बुदं (१००००००००) च |
| वृन्दम् | - | वृन्दम् इति संख्या (१०००००००००) |
| स्थानात् स्थानम् | - | एकस्मात् स्थानात् अग्रस्थानं यावत् |
| दशगुणम् | - | दश इति संख्यया गुणितम् |
| स्यात् | - | भवेत्। |

**आशयः**

एकं (१), दश (१०), शतं (१००), सहस्रं (१०००), अयुतं (१०,०००), नियुतं (१,००,०००), प्रयुतं (१०,००,०००), कोटिः (१,००,००,०००), अर्बुदं (१०,००,००,०००), वृन्दं (१,००,००,००,०००) च क्रमेण दशगुणिताः संख्याः भवेयुः।





२. चन्द्रो जलमर्कोऽग्निः मृद्भूः छायापि या तमस्तद्धि ।
छादयति शशी सूर्यं शशिनं महती च भूच्छाया ॥
(आर्यभटीयम् – गोलपादः ४)

**पदच्छेदः**

| | | |
|---|---|---|
| चन्द्रो जलमर्कोऽग्निः | - | चन्द्रः + जलम् + अर्कः + अग्निः |
| मृद्भूः | - | मृत् + भूः |
| छायापि | - | छाया + अपि |
| तमस्तद्धि | - | तमः + तत् + हि |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| चन्द्रः | - | शशी |
| जलम् | - | जलमयः |
| अर्कः | - | सूर्यः |
| अग्निः | - | अग्निमयः |
| भूः | - | भूमिः |
| मृत् | - | मृण्मयी |
| या छाया | - | रूपीकृता छाया |
| अपि | - | च |





तत् तमः - तत् अन्धकारम्
हि - अस्ति एव
शशी - चन्द्रः
सूर्यम् - आदित्यम्
छादयति - आच्छादयति
तत् सूर्यग्रहणम् - तत् सूर्यग्रहणमिति (अभिधीयते)
महती - विशाला
भूच्छाया - भूम्याः छाया
शशिनम् - चन्द्रम्
छादयति - आच्छादयति
तत् चन्द्रग्रहणम् - तत् चन्द्रग्रहणमिति (अभिधीयते)

**आशयः**

चन्द्रः जलमयः अस्ति। सूर्यः अग्निमयः अस्ति। भूमिः मृण्मयी भवति। यदा चन्द्रः सूर्यं आच्छादयति तदा भूमेः केषुचित् प्रदेशेषु चन्द्रस्य छाया व्याप्नोति। तेषु प्रदेशेषु अन्धकारः दृश्यते। तत् सूर्यग्रहणम्। यदा भूमेः महती छाया चन्द्रं छादयति तदा चन्द्रे अन्धकारं व्याप्नोति तत् चन्द्रग्रहणम्। एते द्वे अवस्थे सूर्यः भूमिः चन्द्रः च ऋजुरेखावस्थितेषु एव सम्भवतः।

## पठनप्रवर्तनानि

**कोष्ठकात् पदानि चित्वा यथोचितं पूरयतु।**

(सूर्यः, चन्द्रः, भूमिः)

  

...................... ...................... ......................

**कोष्ठकात् उचितानि पदानि उपयुज्य पूरयतु ।**

(शतम्, नियुतम् , अयुतम्, दश, सहस्रम् , एकम्)

१ - ........................................

१० - ........................................

१०० - ........................................

१००० - ........................................

१०००० - ........................................

१००००० - ........................................

**उदाहरणानुसारं वाक्यानि पूरयतु ।**

उदा - ........ फलं पतति । (वृक्षः)

**वृक्षात्** फलं पतति ।

सः .......... आगच्छति । (ग्रन्थालयः)

............. तोयं पतति । (आकाशः)

............. बहिः आगच्छति । (निलयः)

**यथोचितं योजयतु ।**

| | | |
|---|---|---|
| आर्यभटीयम् | - | भास्करः |
| लीलावती | - | वाग्भटः |
| अष्टाङ्गहृदयम् | - | अच्युतप्पिषारोटि |
| गोलदीपिका | - | आर्यभटः |

**यदा – तदा प्रयुज्य वाक्यं लिखतु ।**

यथा - छात्राः घण्डानादं श्रृण्वन्ति । छात्राः कक्ष्यां प्रविशन्ति ।

**यदा** छात्राः घण्डानादं श्रृण्वन्ति **तदा** कक्ष्यां प्रविशन्ति ।

यानम् स्थगयति । छात्राः अवतरन्ति ।

वृष्टिः भवति । जनाः छत्रम् उद्घाटयन्ति ।

पदानाम् अर्थं लिखत ।

| | |
|---|---|
| शशी | ............... |
| अयुतम् | ............... |
| धरणी | ............... |
| वर्षाः | ............... |
| सततम् | ............... |

**अमरकोशः**

सूर्यः - भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥

चन्द्रः - हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥

भूमिः - भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥

**नामरूपाणि**

**इकारान्तः पुल्लिङ्गः अग्निशब्दः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अग्निः | अग्नी | अग्नयः |
| सं.प्रथमा | हे अग्ने | हे अग्नी | हे अग्नयः |
| द्वितीया | अग्निम् | अग्नी | अग्नीन् |
| तृतीया | अग्निना | अग्निभ्याम् | अग्निभिः |
| चतुर्थी | अग्नये | अग्निभ्याम् | अग्निभ्यः |
| पञ्चमी | अग्नेः | अग्निभ्याम् | अग्निभ्यः |
| षष्ठी | अग्नेः | अग्न्योः | अग्नीनाम् |
| सप्तमी | अग्नौ | अग्न्योः | अग्निषु । |

**धातुरूपाणि**

**अस (भुवि) धातु परस्मैपदी लट्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः। |

**शब्दकोशः**

| शब्दः | संस्कृतम् | मलयालम् | आङ्गलेयम् | कन्नटा |
|---|---|---|---|---|
| अर्कः | सूर्यः | സൂര്യൻ | The Sun | ಸೂರ್ಯ |
| छादयति | आच्छादयति | മറയ്ക്കുന്നു | Covers | ಮುಚ್ಚುತ್ತದೆ |
| छाया | अनातपः | നിഴൽ | Shadow | ನೆರಳು |
| तमः | अन्धकारम् | ഇരുട്ട് | Darkness | ಕತ್ತಲೆ |
| शशी | चन्द्रः | ചന്ദ്രൻ | The Moon | ಚಂದ್ರ |
| हि | यतः | എന്തെന്നാൽ | Because of | ಯಾಕೆಂದರೆ |

**अधिगताः अंशाः**

पदानि यथोचितम् अपूरयत्।

उचितपदेन वाक्यानि अलिखत्।

यथोचितं योजनं अकरोत्।

यदा-तदा उपयुज्य वाक्यानि अलिखत्।

## अनुबन्धः

**अधिकवाचनांशः**

**आर्यभटीयम्**

प्रशस्तः भारतीयः गणितशास्त्रज्ञः ज्योतिशास्त्रपण्डितः च आसीत् आर्यभटः । क्रिस्त्वब्दस्य ४७६ तमे वर्षे एषः जनिमलभत । तेन गणितज्योतिश्शास्त्रविषये लिखितः ग्रन्थः भवति आर्यभटीयम् । ग्रन्थेऽस्मिन् चत्वारः खण्डाः सन्ति ।

**अधो दत्तं चित्रम् अधिकृत्य चर्चां करोतु ।**



एककम् २

# जीवनयात्रा

जीवने यात्रायाः सविशेषं स्थानमस्ति। यात्राभिः मानसोल्लासः, विद्यार्जनम्, वैविध्यपूर्णः अनुभवः, व्यक्तित्वविकासः, व्यवहारक्षमता, सम्पर्कनैपुणी च वर्धते। एवं यात्राभिः जीवने समुन्नतिं प्रापयामः। एककेऽस्मिन् तीरात् पारम्, आहिमाचलम्, भीमाकारं पश्यामः इति त्रयः पाठाः सन्निवेशिताः भवन्ति।



# चतुर्थः पाठः

# तीरात् पारम्

**चित्रं दृष्ट्वा कागदनौकां निर्मातु ।**



विभिन्नानि उद्देश्यलक्ष्याणि प्राप्तुं जनाः यात्रां कुर्वन्ति। यात्राभ्यः मानसोल्लासं, नूतनानुभवान्, भिन्नसंस्कृतीः च प्रत्यभिजानाति। मानवाः अधुना जलाकाशभूतलेषु यात्रां कर्त्तुं प्रभवन्ति। अस्मिन् पाठे जलयात्राम् अधिकृत्य कविताम् एकां पठामः ।



# तीरात् पारम्

मन्दः पवनो जलप्रवाहो
मनसि च तोषं वर्धयति।
निर्मलसलिले सर्वे तुष्ट्या
स्वप्रतिबिम्बं पश्यन्ति॥

मीना भेका मकरास्सर्वे
सोत्साहं किल क्रीडन्ति।
नौकां नीत्वा गीतं गायन्
नन्दति नैकाचालकः॥

परोपकारं कृत्वा प्रकृतिः
सर्वगुणानपि बोधयति।
लोका जीवनमग्रे नेतुं
तीरात्पारं गच्छन्ति॥

**पदच्छेदः**

| | | |
|---|---|---|
| पवनो जलप्रवाहो मनसि | - | पवनः + जलप्रवाहः + मनसि |
| मकरास्सर्वे | - | मकराः + सर्वे |

**विग्रहः**

| | | |
|---|---|---|
| जलप्रवाहः | - | जलस्य प्रवाहः । |
| स्वप्रतिबिम्बम् | - | स्वस्य प्रतिबिम्बः स्वप्रतिबिम्बः, तम् । |
| सोत्साहम् | - | उत्साहेन सह वर्तत इति । |
| नौकाचालकः | - | नौकां चालयति यः सः। |

## पठनप्रवर्तनानि

**बालकवितां सतालं कक्ष्यायाम् आलपतु ।**



**चित्रानुसारम् उचितां पादटिप्पणीं लिखतु ।**

(नौकाचालकः नदीं तरति । मीनाः सोत्साहं क्रीडन्ति । काकः भोजनावशिष्टं खादति । जले प्रतिबिम्बं पश्यति ।)



..................................................



..................................................



..................................................



..................................................

**पादटिप्पण्याः आशयम् अनुसृत्य चित्रं रचयतु ।**

**वयम् अग्रे गच्छामः ।**

**उदाहरणानुसारं पूरयतु**

| **लट्** | | **लृट्** |
|---|---|---|
| क्रीडति | – | क्रीडिष्यति |
| पठति | – | ............. |
| ............ | – | भविष्यति |
| धावति | – | ............ |
| ............ | – | पतिष्यति |

**कविताः सञ्चित्य सम्पुटं निर्मातु ।**



**पदानाम् अर्थं लिखतु ।**



**अमरकोशः**

पवनः – नभस्वद्वातपवनपवमानप्रभञ्जनाः ।

जलम् - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ।

मत्स्यः - पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
विसारः शकुली चाथ गडकः शकुलार्भकः ॥

**धातुरूपाणि**

**गम्लृ (गतौ) धातुः परस्मैपदी लृट्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः । |

**नामरूपाणि**

**सकारान्तः नपुंसकलिङ्गः मनस् शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| सं. प्रथमा | हे मनः | हे मनसी | हे मनांसि |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतुर्थी | मनसे | मनोभ्याम् | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनस्सु । |

**शब्दकोशः**

| शब्दः | संस्कृतम् | मलयालम् | आङ्गलेयम् | कन्नटा |
|---|---|---|---|---|
| कृत्वा | विधाय | ചെയ്തിട്ട് | Having done | ಮಾಡಿ |
| जीवनम् | जीवितम् | ജീവിതം | Life | ಜೀವನ |
| तोषः | सन्तोषः | സന്തോഷം | Happiness | ಸಂತೋಷ |
| नौकाचालकः | नाविकः | വള്ളക്കാരൻ | Boatman | ದೋಣಿ ಚಾಲಕ |
| पारम् | अपरं तीरम् | മറുതീരം | Other shore | ಮುಂದಿನ ತೀರ |
| पवनः | वायुः | കാറ്റ് | Wind | ಗಾಳಿ |
| भेकाः | मण्डूकाः | തവളകൾ | Frogs | ಕಪ್ಪೆಗಳು |
| मकराः | नक्राः | മുതലകൾ | Crocodiles | ಮೊಸಳೆಗಳು |
| मनसि | चित्ते | മനസ്സിൽ | In the mind | ಮನಸ್ಸಿನಲ್ಲಿ |
| मन्दः | मृदु | ലഘുവായ | Slow | ಮೆಲ್ಲನೆ |
| सर्वे | अखिले | എല്ലാം | All | ಎಲ್ಲಾ |
| सलिले | जले | ജലത്തിൽ | In the water | ನೀರಿನಲ್ಲಿ |

**अधिगताः अंशाः**

बालकवितां सतालम् आलपत्।
चित्रानुसारम् पादटिप्पणीम् अलिखत्।
पादटिप्पणीमनुसृत्य चित्रम् अरचयत्।
लट् लृट् रूपाणि यथोचितम् अलिखत्।
कवितासम्पुटम् अरचयत्।

भवतः प्रदेशे विद्यमानं कमपि जलाशयं वा सुन्दरदेशं वा गत्वा स्वानुभवं वदतु ।



# पञ्चमः पाठः

# आहिमाचलम्



एतौ कौ ? एतयोः जीवनाभिलाषः कः ?
मोहनः विजया च चायापणे कार्यानन्तरं स्वाभिलाषपूर्तीकरणाय आविश्वं यात्रां कृत्वा सफलं जीवनं यापयतः ।

सञ्चाराः जीवनवीक्षणं परिवर्तयन्ति । महात्मानः यात्राभिः स्वानुभवैः च जीवनस्य सफलतां प्रापुः । एवं यात्रया स्ववीक्षणे परिवर्तनं प्राप्तवान् एकः महानुभावः भारते आसीत् । तस्य एकं यात्रानुभवम् अत्र पश्यामः ।



कश्चन बालः बाल्यकाले पित्रा सह यात्रां करोति स्म। एकदा कोल्कत्तातः भोल्पुरं, ततः अमृतसरं ततः हिमालयं च अगच्छत्। हिमालये हिमपूर्णानि महाश्रृङ्गाणि, गजसदृशाः शिलाः, पर्वतसमूहः, अम्बरचुम्बिनः महावृक्षाः, लताः, वनपुष्पाणि, चित्रशलभाः च दृश्यन्ते स्म। अहो ! सुगन्धपूरितः मन्दपवनः, स्वप्नसमानोऽयं प्रदेशः। तानि दृश्यानि बालस्य रवीन्द्रस्य मनः आकर्षति स्म। सः प्रतिदिनं प्रभाते उत्थाय पित्रा साकं प्रभातसञ्चाराय गच्छति स्म। यद्यपि अतिशैत्यम् आसीत् तथापि नदीजले स्नानाय पिता तं प्रेरयति स्म।



यात्रावेलायां पिता संस्कृतम्, आङ्गलम्, ज्योतिषं च तम् अपाठयत्। ततः सः सिद्धरूपाणि काव्यानि च अवाचयत्। कालिदासकाव्यानाम् अनुपमसौन्दर्यं तम् आचकर्ष। सत्यकथनाय पिता बालकं सर्वदा प्रेरयति स्म। गृहस्थजीवनं कथमिति सः अबोधयत्।

सः महानुभावः भवति विश्वप्रसिद्धः महाकविः रवीन्द्रनाथ टागोर्।

**पदच्छेदः**

| | | |
|---|---|---|
| जीवनवीक्षणमपि | - | जीवनवीक्षणम् + अपि |
| स्वप्नसमानोऽयम् | - | स्वप्नसमानः + अयम् |

**विग्रहः**

| | | |
|---|---|---|
| पर्वतसमूहः | - | पर्वतानां समूहः। |
| विश्वप्रसिद्धः | - | विश्वे प्रसिद्धः। |
| महाकविः | - | महान् च असौ कविः च। |

## पठनप्रवर्तनानि

पितृपुत्रयोः स्नेहस्य मकुटोदाहरणं भवति अयं पाठभागः। एतां प्रस्तावनाम् अधिकृत्य भवतां मतं किम् ? चर्चां कृत्वा लघुटिप्पणीं लिखतु।

सूचनाः -

- उभयोः स्नेहः
- शिशोः भावना
- स्वातन्त्र्यम्
- सत्यनिष्ठा
- दीर्घदर्शनम्

यात्रावेलायां टागोर् महाशयः पितरं प्रति विविधान् प्रश्नान् पृच्छति इति चिन्तयतु। तान् प्रश्नान् सम्भाव्य लिखतु।




उदा – प्रकृतिः कथम् एवं सुन्दरी जाता ?

.........................................................

.........................................................

.........................................................

**भवतः यात्रानुभवस्य चित्रं रचयतु। वर्णैः लिम्पतु च।**



**यथोचितं योजयतु।**

| | | |
|---|---|---|
| नोबल् पुरस्कारः | - | जनगणमन |
| देशीयगानम् | - | तूलिकानाम |
| भानुसिंहः | - | गीताञ्जलिः |
| नाटकम् | - | विश्वभारती |
| यत्र विश्वं भवत्येकनीडम् | - | चण्डालिका |

**खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखतु।**



प्रसिद्धः पर्यवेक्षकः प्रसाधकः माध्यमकारः केरलीयः च भवति सन्तोष् जोर्ज् कुलङ्ङर। अनेकानि राष्ट्राणि अनेन सन्दर्शितानि भवन्ति। सञ्चारम् इति दृश्ययात्राविवरणं एष एव अवातारयत्। १९७१ तमे वर्षे डिसम्बर् मासस्य २५ तमे दिने कोट्टयं जिल्लायाः मरङ्ङाट्टुपिल्लि ग्रामे अयं जनिमलभत। अस्य पितरौ वि जे जोर्ज् कुलङ्ङर, ऱोसम्मा जोर्ज् च भवति। यु.एस्.ए. देशे स्थितायाः 'वेर्जिन् गालक्ट्' इति संस्थायाः बहिराकाशयात्राकार्यक्रमे भागं स्वीकृतः प्रथमः भारतीयः भवति अयं नित्यसञ्चारी। नैकानि यात्राविवरणानि अपि एषः व्यरचयत्।

१. सन्तोष् जोर्ज् कुलङ्ङर महोदयस्य दृश्ययात्राविवरणस्य नाम किम्?

२. अस्य पितरौ कौ ?

३. कस्मिन् वर्षे एषः जनिमलभत ?

४. सन्तोष् जोर्ज् कुलङ्ङर कस्याः संस्थायाः बहिराकाशकार्यक्रमे भागम् अग्रहीत् ?

५. खण्डिकायै उचितम् एकं शीर्षकं निर्दिशतु ।

**पदानाम् अर्थं लिखतु ।**




**अमरकोशः**

शिला – पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्।

**धातुरूपाणि**

गम्लृ (गतौ) धातुः परस्मैपदी लङ्

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अगच्छत् | अगच्छताम् | अगच्छन् |
| **मध्यमपुरुषः** | अगच्छः | अगच्छतम् | अगच्छत |
| **उत्तमपुरुषः** | अगच्छम् | अगच्छाव | अगच्छाम । |

**नामरूपाणि**

**ईकारान्तः स्त्रीलिङ्गः नदी शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| सं.प्रथमा | हे नदि | हे नद्यौ | हे नद्यः |
| द्वितीया | नदीं | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु। |

**शब्दकोशः**

| **शब्दः** | **संस्कृतम्** | **मलयालम्** | **आङ्गलेयम्** | **कन्नटा** |
|---|---|---|---|---|
| अनुपमसौन्दर्यम् | निरुपमसौन्दर्यम् | അനുപമ-സൗന്ദര്യം | Utmost Beauty | ಸುಂದರವಾದ |
| अन्तरे | मध्ये | മധ്യത്തിൽ | In the middle of | ಮಧ್ಯಭಾಗದಲ್ಲಿ |
| अम्बरचुम्बिनः | आकाशचुम्बिनः | വളരെ ഉയർന്ന | Very high | ತುಂಬಾ ಎತ್ತರವಾದ |
| उत्थाय | उत्थानं कृत्वा | എഴുന്നേറ്റിട്ട് | Having stoodup | ಮುದ್ದು |
| ततः | तदनन्तरम् | അതിനു ശേഷം | After | ಆನಂತರ |

| शब्दः | संस्कृतम् | मलयालम् | आङ्गलेयम् | कन्नटा |
|---|---|---|---|---|
| महाश्रृङ्गाणि | महाशिखराणि | വലിയ ശിഖരങ്ങൾ | High peaks | ಎತ್ತರದ ಶಿಖರಗಳು |
| शिलाः | पाषाणाः | പാറകൾ | Rocks | ಕಲ್ಲುಗಳು |
| सदृशः | तुल्यः | തുല്യൻ | Equal | ತುಲ್ಯ |
| सर्वदा | सदा | എപ്പോഴും | Always | ಯಾವಾಗಲೂ |
| हिमपूर्णानि | हिमभरितानि | മഞ്ഞു നിറഞ്ഞത് | Snowy | ಹಿಮಭರಿತ |

**अधिगताः अंशाः**

चर्चां कृत्वा टिप्पणीम् अलिखत्।
प्रश्नवाक्यानि अलिखत्।
यात्रानुभवम् आधारीकृत्य चित्रं व्यरचयत्।
यथोचितम् अयोजयत्।
खण्डिकां पठित्वा प्रश्नानाम् उत्तरमलिखत्।

अधो दत्तं चित्रं निरीक्ष्य विनोदयात्राम् अधिकृत्य चर्चां करोतु।

सूचना: -

- स्थानवैशिष्ट्यम्
- प्रकृतिसविशेषता:
- जीवनरीति:
- यात्रानुभवा:



# षष्ठः पाठः

## भीमाकारं पश्यामः

**कथानुसारं चित्राणि संख्यानां साहाय्येन क्रमीकरोतु अवतारयतु च ।**



जन्मना एव मानवाः यात्राकुतुकिनः भवन्ति। देशान्तरगमनाय अस्माकं पूर्वजाः महान्तः उत्साहिनः आसन्। यात्राभिः नूतनानुभवान्, नव्यज्ञानानि, मानसोल्लासं, स्वजीवनविजयं च अनायासं सम्पादयामः। अद्य वयम् एकां यात्रां कुर्मः।



छात्राः अध्यापिकया सह विद्यालयात् विनोदयात्रायै गुरुवायूर् आनक्कोट्टां गच्छन्ति। तत्र प्रवृत्तं सम्भाषणं शृणुमः।

मालविका - पश्यतु तारे! तत्र भीमाकारो गजः अस्ति।

तारा - आम्। सुन्दरोऽयं गजः पर्वत इव दृश्यते।

जोसफः - पश्यतु, शूर्पवत् कर्णौ, स्तम्भवत् पादाः च।

अरविन्दः - अस्य दीर्घा पीना च शुण्डा आश्चर्यं जनयति।

रहीमः - पश्य, तत्र एको गजः नृत्यति।

मीरा - मान्ये! एकस्य गजस्य मस्तकात् जलं स्रवति। तत् कुतः ?

अध्यापिका - समीचीनः प्रश्नः, तत् मदजलमेव, इतोप्यधिकं ज्ञातुं हस्तिपं पृच्छामः। आगच्छन्तु।

अध्यापिका - भो! हस्तिप! किं नाम मदजलम् ?

हस्तिपः - तत्तु गजस्य मदावस्थायां तस्य मस्तकात् जातं द्रावकं भवति।

अरुणः - अत्र कति गजाः सन्ति ?

हस्तिपः - इदानीम् उपचत्वारिंशत् गजाः सन्ति।

ऱसीना - गजः प्रतिदिनं स्नानं करोति किम् ?

हस्तिपः - आम्। नूनं, गजवत् स्नानमाचरेत् इति वचनं प्रथितमेव।

अध्यापिका - आम्, सत्यम्।

अनन्या - मम मातामही गजगीतं पाठितवती।

**मन्दं पुरतश्चरति गजः**<br>
**पर्वतकायो भवति गजः।**<br>
**शुण्डादण्डं धरति गजः**<br>
**इक्षोर्दण्डं वहति गजः॥**

(सम्भाषणानन्तरं सर्वे छात्राः एकीभूय इदं गीतम् उच्चैः आलपन्ति। तदनु यात्रां समाप्य ते विद्यालयं प्रतिगच्छन्ति।)

**पदच्छेदः**

सुन्दरोऽयम् - सुन्दरः + अयम्

इतोऽप्यधिकम् - इतः + अपि + अधिकम्

**विग्रहः**

भीमाकारः - भीमः आकारः यस्य सः।

हस्तिपः - हस्तिनं पाति इति।

मदजलम् - मदविशिष्टं जलम्।

## पठनप्रवर्तनानि

**गजानां नामानि उच्चैः वदतु ।**



गुरुवायूर् केशवन्



चिऱक्कल् कालिदासन्



पाम्पाटि राजन्



तेच्चिक्कोट्टुकाव् रामचन्द्रन्

**अमरकोशं पठित्वा मम पर्यायपदानि लिखतु ।**

गजः - .............................



**सम्भाषणांशं नाटकरूपेण अवतारयतु ।**






**सूचनानुसारं पूरयतु ।**

| | |
|---|---|
| हे गायक, गीतं गायतु । | हे गायकाः गीतं गायन्तु । |
| हे छात्र, पुस्तकं पठतु । | हे छात्राः, पुस्तकं ................. |
| हे पुत्र, शीघ्रं धावतु । | हे पुत्राः, शीघ्रं ........................ |
| हे बालिके, मुखं प्रक्षालयतु । | हे बालिकाः, मुखं .................. |
| हे महिले, अत्र आगच्छतु । | हे महिलाः, अत्र .................... |

कामपि यात्राम् अधिकृत्य दैनिकीं लिखतु ।



कस्यचन प्रदेशस्य ह्रस्वचलच्चित्रं / डोक्युमेन्टरि वा चित्रीकृत्य प्रदर्शयतु ।



**पदानाम् अर्थं लिखतु।**




**अमरकोशः**

गजः - दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः
मतङ्गजो गजो नागः कुञ्चरो वारणः करी।

कर्णः - कर्णशब्दग्रहो श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः।

**धातुरूपाणि**

**दृशिर् (प्रेक्षणे) धातुः कर्मणि लट्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | दृश्यते | दृश्येते | दृश्यन्ते |
| मध्यमपुरुषः | दृश्यसे | दृश्येथे | दृश्यध्वे |
| उत्तमपुरुषः | दृश्ये | दृश्यावहे | दृश्यामहे। |

**नामरूपाणि**

**दकारान्तः त्रिषु लिङ्गेषु समानः अस्मद् शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | मां, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु । |

**शब्दकोशः**

| **शब्दः** | **संस्कृतम्** | **मलयालम्** | **आङ्गलेयम्** | **कन्नटा** |
|---|---|---|---|---|
| गजः | करी | ആന | Elephant | ಆನೆ |
| पीना | स्थूला | തടിച്ച | Fat | ದಪ್ಪವಾದ |
| शुण्डा | हस्तिहस्तः | തുമ്പിക്കൈ | Trunk | ಸೊಂಡಿಲು |
| मान्ये! | पूज्ये! | അല്ലയോ മാന്യേ | Respected | ಗೌರವಾನ್ವಿತ |
| स्रवति | क्षरति | ഒഴുകുന്നു | Flows | ಹರಿಯುತ್ತದೆ |
| समीचीनः | उत्तमः | യുക്തമായത് | Apt | ಸೂಕ್ತ |
| प्रश्नः | पृच्छा | ചോദ്യം | Question | ಪ್ರಶ್ನೆ |
| हस्तिपः | गजपालः | ആനക്കാരൻ | Mahout | ಮಾವುತ |

## अधिगताः अंशाः

प्रसिद्धानां गजानां नामानि अलिखत्।
अमरकोशं पठित्वा पर्यायपदानि अलिखत् ।
सम्भाषणांशं नाटकरूपेण अवातारयत् ।
लोट् रूपाणि अलिखत्।
विनोदयात्रां कृत्वा दैनिकीम् अलिखत् ।
ह्रस्वचलच्चित्रम् अरचयत् प्रादर्शयत् च ।

**क्रीडया के के गुणाः लभन्ते ? चर्चां करोतु ।**



एककम् ३

# जीवनविजयः

